# Naradakritam Hari Stotram

# નારદકૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Naradakritam Hari Stotram

File name : nAradakRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 206/24-35||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# નારદકૃતં હરિસ્તોત્રમ્

તાવન્નારાયણસ્તત્ર શઙ્ખચક્રગદાઽબ્જવાન્ ।
પીતામ્બરઃ સકૌસ્તુભવનમાલોપવીતકઃ ॥ ૨૪॥

શ્રીવત્સાઙ્કિતવક્ષાશ્ચ કમલાસ્વર્ણરેખકઃ ।
સુનન્દાદ્યૈઃ પાર્ષદૈશ્ચ સેવમાનઃ સુહાસ્યવાન્ ॥ ૨૫॥

દર્શયામાસ રૂપં સ્વં નારદાય તપસ્વિને ।
દૃષ્ટ્વા તં સહસોત્થાય નમસ્કૃત્ય કૃતાઞ્જલિઃ ॥ ૨૬॥

તુષ્ટાવ પરમાત્માનં કરુણાસાગરં પ્રભુમ્ ।
જગતામીશ્વરં સાક્ષિરૂપં ભક્તકૃતાદરમ્ ॥ ૨૭॥

કૃપાલું તાપસં દિવ્યં વન્દે પ્રસીદ પાવન! ।
સતાં લોકસ્ય રક્ષાયૈ હિતાય તપ આદધન્ ॥ ૨૮॥

તપઃફલપ્રદાતર્મે પ્રસીદ સત્ત્વમૂર્તિમન્! ।
કોટિકન્દર્પલાવણ્યવિલાસઃ કામવર્જિતઃ ॥ ૨૯॥

બ્રહ્મચાર્યસિ દેવેશ પ્રસીદ સત્યવાગ્વિભો ।
આશ્રિતાનાં કલ્પવૃક્ષો દીનાનાં દુઃખહારકઃ ॥ ૩૦॥

જ્ઞાનેન બન્ધહા બ્રહ્મસુખદાતા પ્રસીદતામ્ ।
જીવાન્તરિન્દ્રિયસૂક્ષ્મભૂતાઽન્તર્યામિનીશ્વર ॥ ૩૧॥

બ્રહ્મસુખાનુભૂતે ત્વં પ્રસીદ ચિદચિન્મય ।
યદાશ્રિતાઃ સુરા દુઃખામ્બુધિં તરન્તિ ગોપદમ્ ॥ ૩૨॥

નમસ્તે સર્વદા પરબ્રહ્મણે બ્રહ્મણે તથા ।
વાસુદેવાય કૃષ્ણાય ભૂમ્ને નારાયણાય ચ ॥ ૩૩॥

મહાવિષ્ણુસ્વરૂપાય વૈરાજાય ચ તે નમઃ ।
નમો હિરણ્યકોશાય ત્રિદેવેભ્યો નમો નમઃ ॥ ૩૪॥

અદ્ય મે સફલં જન્મ ચાદ્ય મે સફલં તપઃ ।
અદ્ય મે સફલં જ્ઞાનં શ્રીહરે તવ દર્શનાત્ ॥ ૩૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૨૦૬-અધ્યાયાન્તર્ગતં
નારદકૃતં હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૨૦૬/૨૪-૩૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 206/24-35..

Proofread by PSA Easwaran

*Naradakritam Hari Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*